# CBSE Class 12 Sanskrit Core 2025 - Set-4 (22)

## Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

**Time Allowed: 3 Hours** **Maximum Marks: 80**

### General Instructions

(i) इस प्रश्नपत्र में कुल **18** प्रश्न और चार खण्ड हैं।

(ii) खण्ड क: प्रश्न 1। खण्ड ख: प्रश्न 2–4। खण्ड ग: प्रश्न 5–8। खण्ड घ: प्रश्न 9–18।

(iii) प्रत्येक प्रश्न में दिए गए विशिष्ट निर्देशों और आंतरिक विकल्पों के अनुसार उत्तर दीजिए।

(iv) उत्तर लिखने से पहले प्रश्न की संख्या अवश्य लिखिए।

# Section A

**1.**

सेवा अस्माकं परमधर्मः । सेवायाः अयम् एव अभिप्रायः यत् मानवः परस्परं सम्यग्रूपेण साहाय्यं कुर्यात् । सर्वो हि विविधरूपेण सक्षमः । स्वक्षमतया परेभ्यः सहयोग-प्रदानेन हि जीवनस्य सार्थक्यं भवति । सेवा द्विविधा भवति - पारमार्थिकी लौकिकी च । पारमार्थिक-सेवया महात्मानः जनेभ्यः ज्ञानं यच्छन्ति । ते तेषां दोषनिवारणार्थं पारस्परिकं वैमनस्यं च दूरीकर्तुं प्रयतन्ते । सांसारिकसम्बन्धेषु लौकिकसेवायाः अपि महत्त्वम् विद्यते । एकस्य असहायस्य सेवा लौकिकी सेवा भवति । अनया समाजे शोभनाः सम्बन्धाः जायन्ते । जनानां समस्यानां समाधानम् अपि भवति । जनाः सदैव एतदेव चिन्तयन्तु - यद् यावद् वयं स्वस्थाः सक्षमाः तावद् अस्माकं परमं कर्तव्यं सामाजिक सेवा भवेदिति । वस्तुतः अयमेव मानवीयधर्मः ।

---

**1(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) मानवः परस्परं सम्यक् किं कुर्यात् ?

(ii) महात्मानः जनेभ्यः किं यच्छन्ति ?

(iii) लौकिकी सेवया समाजे कीदृशाः सम्बन्धाः जायन्ते ?

---

**1(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) सेवायाः कः अभिप्रायः ?

(ii) कस्य सेवा लौकिकी सेवा भवति ?

(iii) जनाः सदैव किं चिन्तयन्तु ?

---

**1(इ).**

अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत ।

---

**1(ई)(i).**

'वैमनस्यं' इति पदस्य विशेषणपदं चिनुत ।

(A) पारस्परिकम्  (B) सार्थक्यम्
(C) वयम्  (D) अस्माकम्

---

**1(ई)(ii).**

पारमार्थिक-सेवया महात्मानः जनेभ्यः ज्ञानं यच्छन्ति । अत्र 'महात्मानः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ? ।

(A) पारमार्थिक-सेवया  (B) यच्छन्ति
(C) जनेभ्यः  (D) ज्ञानम्

---

**1(ई)(iii).**

'अक्षमः' इति पदस्य विलोमपदं चिनुत ।

(A) स्वस्थः  (B) सार्थक्यम्
(C) साहाय्यम्  (D) सक्षमः

---

**1(ई)(iv).**

'ते तेषां दोषनिवारणार्थं प्रयतन्ते' अत्र वाक्ये 'ते' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(A) 'जनेभ्यः'  (B) 'महात्मानः' इति कृते
(C) 'सेवायाः' इति कृते  (D) मानवेभ्यः

## Section B

**2.**

भवती श्रुति: । भवत्सखी मुंबई नगरे वसति । भवत्या: विद्यालये एका पर्यावरणगोष्ठी सञ्जाता । गोष्ठीं वर्णयन्ती श्रुति: स्वसखीं मीनाक्षी प्रति पत्रं लिखति । अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषापदै: पूरयित्वा पत्रं पुन: लिखत ।

पत्रम्

दिल्लीत:,

दिनाङ्क:___

प्रियसखि (i)___!

सप्रेम (ii)___!

गतसप्ताहे अस्माकं विद्यालये पर्यावरणविषये एका पर्यावरणगोष्ठी सम्पन्ना । तस्यां महानगरेषु प्रवर्धमानं (iii)___ दृष्ट्वा (iv)___ रक्षणाय तस्य उपायानां विषये (v)___ स्वविचारा: प्रकटिता: । ते अकथयन् यत् पारिवारिकै: (vi)___ रथ्यासु अवकर: न क्षेप्तव्य: । जलप्रदूषणं दूरीकर्तुं नगरपालिकाया: (vii)___ सूचनीया: । जनानां प्रबोधनाय यथास्थानं 'जलमेव जीवनं' 'वृक्षा: रक्षणीया:' इत्यादिका: लेखपट्टिका: स्थापयितव्या: । वाटिकासु, उद्यानेषु विद्यालयेषु च वृक्षा: (viii)___ । ध्वनिप्रसारक-यन्त्राणां प्रयोग: यथाशक्यं न विधातव्य: । अस्मिन् विषये भवद्विद्यालये यदि एतादृशी गोष्ठी भवेत् तर्हि (ix)___ ।

पितृभ्यां नम: ।

भवत्या: सखी

(x)___

मञ्जूषा: नमस्ते, मीनाक्षि!, प्रदूषणं, वैज्ञानिकै:, श्रुति:, पर्यावरणस्य, सदस्यै:, रोपणीया:, अधिकारिण:, सूचयितव्या ।

**3(क).**

मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखित-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत । कस्मिंश्चिद् ग्रामे कश्चन (i)___ वृद्ध: आम्रवृक्षस्य आरोपणं करोति स्म । तदैव (ii)___ आगत: कश्चन युवा तं वृद्धम् दृष्ट्वा (iii)___ 'भो वृद्ध ! आम्रवृक्षा: तु प्राय: द्वादशवर्षानन्तरं (iv)___ । तव अवस्थां (v)___ तु प्रतीयते यत् यदा अयं वृक्ष: (vi)___ दास्यति, तदा त्वं जीवित: न (vii)___ । अत: वृथा (viii)___ ?' एतत् निशम्य वृद्ध: तत्र फलयुक्तान् वृक्षान् दर्शयित्वा (ix)___ 'यथा मया अन्यै: आरोपितानां वृक्षाणां फलानि खादितानि, एवमेव अन्येऽपि मया आरोपितानां वृक्षाणां फलानि खादिष्यन्ति - इति (x)___ एव अहम् आम्रवृक्षम् आरोपयामि ।'

मञ्जूषा: अकथयत्, विचार्य, अशीतिवर्षीय:, नगराद्, दृष्ट्वा, परिश्रमेण, भविष्यसि, फलन्ति, फलानि, अपृच्छत् ।

OR

OR

### 3(ख).

अधोलिखित-संवादे रिक्तस्थानानि मञ्जूषाप्रदत्त-वाक्यैः पूरयत । अनिलः - भो अजय ! किं त्वं जानासि यत् गान्धिमहोदयानां जन्मदिवसः कदा भवति ? अजयः - मित्र अनिल ! (i)___ । अनिलः - आम् ! अक्टूबर-मासस्य द्वितीये दिवसे तु अस्माकं पूर्वप्रधानमन्त्रिणः अपि जन्मदिवसः भवति । जानासि तस्य नाम किम् ? अजयः - आम् (ii)___ । अनिलः - शोभनम् । सत्यमुक्तम् । सः लालबहादुरः शास्त्री तु सौम्यप्रकृतिः, राष्ट्रभक्तः परिश्रमी च आसीत् । अस्मिन् दिने कीदृग्-वस्त्राणां मूल्यं न्यूनं भवति ? अजयः - जानामि । (iii)___ । अनिलः - शोभनम् - खादीवस्त्राणां निर्माणं तु कुटीरोद्योगे भवति । खादीवस्त्र-निर्माणाय प्रमुखं यन्त्रं किमासीत् ? अजयः - मित्र ! (iv)___ । अनिलः - शोभनम् । चरखा-यन्त्रं तु स्वतन्त्रतान्दोलनेऽपि प्रमुखं साधनमासीत् । खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण के कुर्वन्ति ? अजयः - (v)___ । अनिलः - शोभनम् । नेतारस्तु खादीवस्त्रेषु शोभनाः दृश्यन्ते । शोभना खल्वेषा वेशभूषा । अतः सर्वैः जनैः अपि खादीवस्त्राणाम् उपयोगः करणीयः ।

मञ्जूषाः चरखा यन्त्रम् आसीत् ।, जाने, श्री लालबहादुरः शास्त्री ।, खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण नेतारः कुर्वन्ति ।, गान्धीमहोदयानां जन्मदिवसः अक्टूबर-मासस्य द्वितीये दिवसे भवति ।, अस्मिन् दिने खादीवस्त्राणां मूल्यं न्यूनं भवति ।

### 4.

अधोलिखित-वाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत ।

(i) छात्र संस्कृत गीत गाते हैं । (The students sing a Sanskrit song.)

(ii) जल ही जीवन है । (Water is life.)

(iii) अर्णव संस्कृत पढ़ता है । (Arnav reads Sanskrit.)

(iv) हम सब घूमने के लिए गाँव जाते हैं । (We all go to village for a tour.)

(v) तुम सब आज विद्यालय जाओगे । (You all will go to school today.)

(vi) कल विद्यालय में अवकाश था । (Yesterday was a holiday in school.)

(vii) विद्यालय के चारों तरफ वृक्ष हैं । (There are trees all around the school.)

## Section C

**5(i).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
<u>सत्यान्न</u> प्रमदितव्यम्।

**5(ii).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
अथ कुतः <u>उत्पन्नोऽयं</u> दोषः।

**5(iii).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
<u>योगेन + अन्ते</u> तनुत्यजाम्।

**5(iv).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
त्वया <u>यथोचितं</u> व्यवहरिष्यति।

**5(v).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
<u>स्वागतम्</u> अतिथये।

**5(vi).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
<u>तत् + अन्वये</u> शुद्धिमति प्रसूतः।

**5(vii).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं छः प्रश्न)
कामः <u>क्रोधः + तथा</u> लोभः।

**6(i).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।
आचार्याय प्रियं धनमाहृत्य <u>प्रजातन्तुं</u> मा व्यवच्छेत्सीः।

(A) प्रजायाः तन्तुम्
(B) प्रजायां तन्तुम्
(C) प्रजां तन्तुम्
(D) प्रजायै तन्तुम्

**6(ii).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।
येन <u>अकार्यं</u> करिष्यति।

(A) अन् कार्यम्
(B) मा कार्यम्
(C) न कार्यम्
(D) आदि कार्यम्

## 6(iii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
वार्धके मुनीनां वृत्ति: येषां तेषाम् ।

(A) मुनये-वृत्तीनाम्
(B) मुनिवृत्तीनाम्
(C) मुनीवृत्तीनाम्
(D) मुनिवृत्तय:

## 6(iv).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
त्वया यथोचितं व्यवहरिष्यति ।

(A) यथा उचितम्
(B) यथा अनुचितम्
(C) उचितं यथा
(D) उचितम् अनतिक्रम्य

## 6(v).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
कोकिलानां मधुराणि वचांसि श्रुत्वा सर्वे प्रसन्ना: भवन्ति ।

(A) मधुरवच:
(B) मधुवच:
(C) मधुरवचांसि
(D) मधुरवचसाम्

## 6(vi).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
धर्मार्थकामा: जीवने साधनीया: ।

(A) धर्म: च अर्थ: च काम: च
(B) धर्मम् अर्थम् कामम्
(C) धर्मेण अर्थकामौ
(D) कामम् च अर्थम् च धर्म: च

## 6(vii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
लब्धमिमं प्राप्स्ये मनोरथम् ।

(A) मनस: रथम्
(B) मन: रथम्
(C) मनसि रथम्
(D) मनसे रथम्

## 7(i).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
एवम् उपासितव्यम् ।

(A) उप + अस् + ल्यप्
(B) उप + आस् + तव्यत्
(C) उप + अस् + क्त
(D) उप + आस् + अनीयर्

## 7(ii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
भवदभिषेको नि + वृत् + क्त ।

(A) निवृत्तवान्
(B) निवृत्य
(C) निवृत्त:
(D) निवार्य

## 7(iii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
अङ्गुलीव उरगक्षता ।

(A) उरगक्षत + क्त
(B) उरगक्षत + टाप्
(C) उरगक्षत + तव्यत्
(D) उरगक्षत + क्तवतु

**7(iv).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
शठ: सहस्रैरपि <u>शिक्ष्यमाण:</u> ।

(A) शिक्ष् + मतुप्  (B) शिक्ष् + शतृ
(C) शिक्ष्य् + तव्यत्  (D) शिक्ष् + शानच्

**7(v).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
राजाज्ञा <u>पालनीया</u> ।

(A) पाल् + अनीयर्  (B) पल् + अनीयर्
(C) पाल् + नीया  (D) पाल् + तव्यत्

**7(vi).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
सिद्धोऽहं <u>बलवान्</u> सुखी ।

(A) बल + शानच्  (B) बल + क्तवतु
(C) बल + मतुप्  (D) बल + इन्

**7(vii).**

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत ।
नास्ति मत्कृते <u>आवश्यकता</u> अवलम्बनस्य ।

(A) आवश्यक + क्तवतु  (B) आवश्यक + तल्
(C) आवश्यक + तव्यत्  (D) आवश्यक + टाप्

**8(i).**

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
नूनं वसुमती ___ समं यास्यति ।

(A) तुभ्यम्  (B) त्वया
(C) त्वम्  (D) त्वाम्

**8(ii).**

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
हा धिक् ___ !

(A) वयम्  (B) अस्माभि:
(C) अस्मान्  (D) अस्माकम्

**8(iii).**

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
___ न प्रमदितव्यम् ।

(A) कुशलम्  (B) कुशलेन
(C) कुशलात्  (D) कुशलस्य

**8(iv).**

समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)
अहम् अधुनैव ___ पारदभस्म ददामि ।

(A) त्वाम्  (B) तुभ्यम्
(C) तव  (D) त्वया

## Section D

**9.**

पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजा: पर्यपालयत् । तस्य वार्धक्ये 'भोज' इति पुत्र: समजनि । स: यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यान् आहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास - यद्यहं राज्यलक्ष्मी-भारधारण-समर्थं सहोदरम् अपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवाद: । अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा । पुत्रहानि: वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच ।

**9(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) कस्मिन् राज्ये सिन्धुल-संज्ञ: राजा प्रजा: पर्यपालयत् ?

(ii) राज्ञ: कदा 'भोज' इति पुत्र: समजनि ?

(iii) राज्ञ: सिन्धुलस्य अनुज: क: आसीत् ?

**9(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) पिता आत्मन: जरां ज्ञात्वा पुत्रं च बालं संवीक्ष्य किं विचारयामास ?

(ii) पुत्रहानि: वंशोच्छेदश्च इति विचार्य राज्ञा किं कृतम् ?

(iii) राजा बालपुत्राय राज्यप्रदाने किमनर्थं चिन्तयति ?

**9(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'राजा' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'अधुना' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(iii) राजा मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास । अत्र वाक्ये 'मुञ्जम्' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

**10.**

कर्णामृतं सूक्तिरसं विमुच्य, दोषेषु यत्न: सुमहान् खलानाम् ।
निरीक्षते केलिवनं प्रविश्य, क्रमेलक: कण्टकजालमेव ।।

**10(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) केषां यत्न: दोषेषु भवति ?

(ii) सूक्तिरसं कीदृशं भवति ?

(iii) क: कण्टकजालं निरीक्षते ?

**10(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) किं विमुच्य खलानां यत्न: दोषेषु एव भवति ?

(ii) क्रमेलक: कुत्र प्रविशति ?

(iii) क्रमेलक: केलिवने किं निरीक्षते ?

**10(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'यत्न:' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

(ii) 'दुष्टानाम्' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?

(iii) 'गुणेषु' इति पदस्य कृते विलोमपदं किं प्रयुक्तम् ?

**11.**

कुण्डला - परस्परप्रीतिमतो: भवतो: उपदेशस्य नास्ति कोऽपि अवकाश:, तदापि सखीस्नेह: मां भाषयति - भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च । यतो हि धर्मार्थ-काम-संसिद्धये यथा भार्या भर्तु: सहायिनी भवति तथा न कोऽपि अन्य: । परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत: । पति: यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति - तत्खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति । ऋतध्वज: - लक्ष्म्या: रक्षार्थं पत्न्या: सहयोग: अनिवार्य: । मदालसा - कुण्डले ! लक्ष्मीपूजायां न मे प्रवृत्ति: । यदि लक्ष्मी: पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कार: ।

**11(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) तदापि क: मां भाषयति ?

(ii) भर्त्रा सदैव का भर्तव्या रक्षितव्या च ?

(iii) मदालसाया: कस्यां न प्रवृत्ति: ?

**11(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) त्रिवर्गं कौ साधयत: ?

(ii) कस्मै भार्या भर्तु: सहायिनी भवति ?

(iii) पति: यदि स्वार्जितं प्रभूतं धनं गृहमानयति तत् पत्न्यभावे तद्धनं कां गतिं भजते ?

**11(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'साधयत:' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'निवृत्ति:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(iii) 'सहायिनी' शब्दस्य विशेष्यपदं किं प्रयुक्तम् ?

**12(क).**

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत । प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरस्तासां, केवलं जन्महेतव: ।। भावार्थ: राजा दिलीप: प्रजानां विनम्रताशिक्षणात् (i)___ भरणात् अपि (ii)___ आसीत् । तासां पितर: तु केवलं (iii)___ आसन् ।
मञ्जूषा: पिता, जन्महेतव:, रक्षणात् ।
OR

OR

**12(ख)(अ).**

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । वेदमनूच्य आचार्य: अन्तेवासिनम् अनुशास्ति ।

(A) आचार्य: वेदं पाठयति ।

(B) शिष्य: वेदं पठति ।

(C) आचार्य: वेदं पाठयित्वा शिष्यम् उपदिशति ।

OR

**12(ख)(आ).**

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । अपूर्व: खल्वस्यायास: ।

(A) अस्य आयास: प्रशंसनीय: ।

(B) अस्य प्रयास: विफल: ।

(C) अस्य (लक्ष्मणस्य) प्रयास: निश्चितरूपेण अद्वितीय: ।

OR

**12(ख)(इ).**

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । मया दृढं परीक्षितोऽसि ।

(A) अहं तव कठिनपरीक्षां कृतवान् ।

(B) मया त्वं परीक्ष्यसे ।

(C) त्वं मया सम्यक् दृष्ट: असि ।

**13.**

अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दानां सहायतया पूरयत । दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ ! संपदमासुरीम् ।। अन्वय: हे पार्थ ! दम्भ: (i)___ अभिमान: च क्रोध: पारुष्यम् एव च अज्ञानं च (ii)___ संपदम् (iii)___ (लक्षणमस्ति) ।
मञ्जूषा: आसुरीम्, दर्प:, अभिजातस्य ।

### 14.

क स्तम्भस्य वाक्यानां ख स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत । क स्तम्भ: (i) भरतो वा भवेद् राजा (ii) आचार्याय प्रियं धनमाहृत्य (iii) महाराजस्य सन्ध्योपासनसमये (iv) आत्मनो वधयोजनां ज्ञात्वा
ख स्तम्भ: (1) भवादृशानां प्रवेशसमयो भवति (2) वयं वा ननु तत्समम् (3) भोज: किमपि वत्सराजं कथितवान् (4) प्रजातन्तुं मा व्यवच्छेत्सी: ।

### 15.

अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत ।
(i) प्रसक्ता: कामभोगेषु पतन्ति नरके-अशुचौ ।
(ii) नैकेनापि समं गता वसुमती ।
(iii) सर्वस्य लोचनं शास्त्रम् ।
(iv) त्वादृशा एव वस्तुत: पुरस्कारभाजनानि भवन्ति ।
मञ्जूषा: पृथ्वी, अपवित्रे, पात्राणि, नेत्रम् ।

### 16(i).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'मातुराज्ञा गरीयसी' इति पाठ: कस्मात् पुस्तकात् संगृहीत: ?

### 16(ii).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'शिवराजविजयम्' इति ग्रन्थस्य रचनाकार: क: ?

### 16(iii).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'प्रजानुरञ्जको नृप:' अस्य पाठस्य लेखक: क: ?

### 16(iv).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'मदालसा' पाठस्य लेखिका का ?

### 17(i).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: कालिदास:, चम्पू:, माघस्य, पदलालित्यम् ।
शिशुपालवध-महाकाव्यम् ___ रचना अस्ति ।

### 17(ii).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: कालिदास:, चम्पू:, माघस्य, पदलालित्यम् ।
दण्डिन: काव्येषु ___ प्रसिद्धमस्ति ।

### 17(iii).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: कालिदास:, चम्पू:, माघस्य, पदलालित्यम् ।
गद्यपद्यमयं काव्यम् ___ कथ्यते ।

### 17(iv).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: कालिदास:, चम्पू:, माघस्य, पदलालित्यम् ।
उपमाप्रसिद्ध: ___ अस्ति ।

### 18.

समुचितं मेलयत । क स्तम्भ: (i) नाट्यशास्त्रम् (ii) नाटकस्य अन्ते (iii) कादम्बरी (iv) अभिज्ञानशाकुन्तलम्
ख स्तम्भ: (1) बाणभट्ट: (2) कालिदास: (3) भरतवाक्यम् (4) भरतमुनि:

**- End of Question Paper -**